## पञ्चमः पाठः

# वयं स्वाधीनाः

CRS4QS

लोकेऽधुना वयं स्वाधीनाः।

तिमिरो गतः प्रकाशो जातः।।

क्रीडार्थं दिवसोऽप्यायातः।

नव्यं युगं नवीनो देशो वार्तागताखिला प्राचीना।।

लोकेऽधुना वयं स्वाधीनाः ।। 1 ।।

पद्मश्रीर्विहसति पुलिनेषु।

हासः खेलति जनाधरेषु।

धनान्विताः सर्वे दृश्येरन् शिष्येरन् देशे न हि दीनाः।।

लोकेऽधुना वयं स्वाधीनाः ।। 2 ।।

स्त्रीपुंसयोः समोऽस्त्यधिकारः।

स्वप्नो जातोऽयं साकारः।

संविधाननवपथानुकूला शासननीतिर्नवा नवीना।।

लोकेऽधुना वयं स्वाधीनाः ।। 3 ।।

शान्तिर्मिलति सुरक्षान्यायः।

सहकारः सहचरः सहायः।

उच्चाशयता पुना राजते मनसि भावना कापि न हीना ।।

लोकेऽधुना वयं स्वाधीनाः ।। 4 ।।

-डॉ0 आजाद मिश्रः ‘मधुकर’

शब्दार्थः

**अधुना** = इस समय। **तिमिरः** = अन्धकार। **दिवसोऽप्यायातः** = (दिवसः+अपि+ आयातः) दिवस भी आ गया। **नव्यम्** = नया। **वार्तागताखिला प्राचीना** =(वार्ता$गता$ अखिला) बात सम्पूर्ण रूप से समाप्त हो गयी, पुरानी परिस्थितियां अब नहीं रहीं। **पद्मश्रीः** = कमलों की शोभा। **पुलिनेषु** = तटों पर। **अधरेषु** = ओठों पर। **धनान्विताः**=धन से युक्त, धनवान्। **दृश्येरन्** = दिखलायी दें। **शिष्येरन्**=शेष रहें। **समोऽस्त्यधिकारः**=(समः+अस्ति+अधिकारः) समान अधिकार है। **सहकारः** = सहयोग। **सहचरः** = साथी। **उच्चाशयता** = उच्च विचार।

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत -**

क्रीडार्थम् दिवसोऽप्यायातः उच्चाशयता स्वतन्त्रतायाः

पद्मश्रीर्विहसति धनान्विताः शिष्येरन् समोऽस्त्यधिकारः

**2. पूर्णवाक्येन उत्तरत-**

(क) अधुना लोके वयं कीदृशाः स्मः ?

(ख) अखिला प्राचीना वार्ता किम् अभवत् ?

(ग) पुलिनेषु का विहसति ?

(घ) अस्माकं कः स्वप्नः साकारः जातः ?

(ङ) इदानीं शासननीतिः कीदृशी अस्ति ?

**3. सन्धि-विच्छेदं कुरुत -**

पदम् सन्धि-विच्छेदः

जनाधरेषु ....................................

पथानुकूला ....................................।

स्वाधीनाः ....................................।

**4. समासविग्रहं कुरुत -**

पदम् समासविग्रहः

शासननीतिः शासनस्य नीतिः

भोजनालयः ............................

पाठशाला .............................

वटवृक्षः .............................

**5. उपसर्गाणां क्रियाणां च योगं कृत्वा पदनिर्माणं कुरुत-**

यथा- अव+ अकिरत् = अवाकिरत्

प्र + अचलत् = ............................

आ + हसति = ............................

सम् + अकरोत् = ............................

परा + अवर्तत = ............................

उप+अगच्छत् = ............................

वि +हसति = .........................

**6. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) आज हमारा देश स्वतन्त्र है।

(ख) अन्धकार समाप्त हो गया है।

(ग) जल में कमल खिले हुए हैं।

(घ) समाज में स्त्री-पुरुषों को समान अधिकार प्राप्त है।

(ड़) हम एक साथमिलकर रहते हैं।

**7. श्लोकांशान् योजयत-**

'क' 'ख'

पद्मश्रीर्विहसति पुलिनेषु सहकारः सहचरः सहायः।

स्त्रीपुंसयोः समोऽस्त्यधिकारः हासः खेलति जनाधरेषु।

शान्तिर्मिलति सुरक्षान्यायः स्वप्नो जातोऽयं साकारः।

संविधाननवपथानुकूला मनसि भावना कापि न हीना।

उच्चाशयता पुना राजते शासननीतिर्नवा नवीना।

शिक्षण-सङ्केतः

1. पाठस्य कवितायाः सामूहिकवाचनं कारयत।

2. कवितायाः भावं हिन्दीभाषायां लेखनस्य अभ्यासं कारयत।

## स्मरणीयम्

**रसाणां नामानि**

**कटुः**-कड़वा **तिक्तः-**तीखा

**कषायः-**कसैला **मधुरः**-मीठा

**अम्लः**-खट्टा **लवणः**-नमक

**सम्भावितस्य चाकीर्तिः मरणादतिरिच्यते।**